# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – ७ | गुणाः – ५० |
| विषयः – सर्वदर्शनम् | सत्रम् – ६ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – २०/०७/२०२१ | सन्दर्भग्रन्थः – वेदान्तपरिभाषा (अर्थापत्तिपरिच्छेदात् आन्तम्) | |

**सूचना -** **निम्नलिखितेषु दशप्रश्नेषु केचन पञ्च प्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**

१ श्रुतार्थापत्तिः।

२ अर्थापत्तिशब्दस्य व्युत्पत्तिः।

३ अनुपलब्धिप्रमाणस्य लक्षणम्।

**प्रश्नः २ स्वतः प्रामाण्यवादं सविस्तरं प्रतिपादयत।**

**प्रश्नः ३ चतुर्विधम् अभावं सोदाहरणं निरूपयत।**

**प्रश्नः ४ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**

१ ब्रह्मणः द्विविधं लक्षणम्।

२ सूक्ष्मशरीरस्य स्वरूपम्।

३ जीवस्य तिस्रः अवस्थाः।

**प्रश्नः ५ चतुर्विधं प्रलयं यथाग्रन्थम् उपपादयत।**

**प्रश्नः ६ वेदान्तदर्शनानुसारं जगतः उत्पत्तिक्रमं निरूपयत।**

**प्रश्नः ७ अधोलिखितेषु प्रश्नेषु द्वयोः प्रश्नयोः व्याख्यात्मकम् उत्तरं लिख्यताम्।**

१ तत्-त्वं पदार्थयोः अर्थः

२ श्रवण-मनन-निदिध्यासनानि।

३ शमादिषट्कम्।

**प्रश्नः ८ अनुपलब्धिप्रमाणं यथाग्रन्थं प्रतिपादयत।**

**प्रश्नः ९ वेदान्तमतानुसारं मोक्षस्वरूपं प्रतिपाद्य तस्य साधनम् उपवर्णयत।**

**प्रश्नः १०  अधोनिर्दिष्टेषु केषाञ्चित् दश प्रश्नानाम्  अतिलघूत्तरं  यच्छत।**

१ का नाम अर्थापत्तिः?

२ अर्थापत्तिः कतिविधा?

३ "विश्वजिता यजेत" इत्यत्र कस्य पदस्य अध्याहारः क्रियते?

४ वेदान्तमते कति प्रमाणानि सन्ति?

५ किं नाम अनुपलब्धिप्रमाणम्?

६ योग्यानुलब्धेः व्युत्पत्तिः का?

७ अनिर्वचनीयख्यातिः कस्मिन् दर्शने स्वीक्रियते?

८ अभावः कतिविधः?

९ वेदान्तमते कति प्रमाणानि सन्ति?

१० सत्यं ज्ञानम् अनन्तम् इति कस्य लक्षणम्?

११ ज्ञानेन्द्रियाणि कति कानि च तानि?

१२ लक्षणा कतिविधा?

१३ पृथिव्यां कति गुणाः प्राप्यन्ते?

१४ सूक्ष्मशरीरे कति अवयवाः सन्ति?

१५ वेदान्तपरिभाषाकारः कः?

****